प्रभूतम् । मध्यंदिने यावदहानि पञ्च शिवा समीपे नगरस्य यस्य । विरौति घातं विदधाति तस्य भयञ्च वह्निप्रभवं प्रभूतम् । पश्चार्द्धरात्राणि कथञ्चिदेषा क्रूरारवा व्याहरते शृगाली । यस्यान्तिके तं बहवो हठेन मुष्णन्ति चौरा जनसन्निवेशे । स्थानस्य यस्योपगता समीपं दिनानि पञ्चोच्चरति प्रभाते । स्वरेण रौद्रेण शृगालभार्य्या स्यात्तत्र हानिर्महती नराणाम् । सुरक्षितस्यापि मनुष्यवत्स्वामिस्य शीघ्रं हरणं विधत्ते । त्रयं दिनानां दिवसावसाने शिवा रटन्ती परुषस्वरेण । दिक्षारटन्ती सकलासु रौद्रं भ्रमत्यखिन्ना परितः पुरस्य तु । शृगालभार्य्या खलु तद्ब्रवीति युद्धं महत्तत्र महाभिघातम् । ज्वालां विमुञ्चत्यतिरौद्रनादा समाकुला धावति या समन्तात् । कौमारकं या जनयत्यकस्मात् कुर्य्याच्छिवा सा युवराजपातम् । रोमोद्गमं या जनयत्यकस्मात् फे इत्यतिक्रूररवा नराणाम् । मूत्रं पुरीषन्तु तुरङ्गमाणां सा सर्वदा स्याच्छिवा शिवेह । करङ्कियोरोधसि सौम्यरूपांस्तीन् पञ्च वा मुञ्चति या निनादान् । शिवां शिवां तां नृपतिस्तदानीं वन्देत देवीमभिवन्दनीयाम् । श्मशानभूमौ दिनमध्यभागे मध्ये रजन्याः खलहप्रदेशे । या रौति तस्यै बलिमर्घ्यमुक्तं भक्त्या प्रदद्यात्तु यदि भद्रमिच्छेत् । सर्व्वेषु कार्य्येषु समुद्यतेषु बलिः शिवाया विनिवेदनीयः । गृह्णाति यस्मिन् विषयेऽभ्युपेत्य देवी बलिं जल्पति तत्र सिद्धिम्" "कथ्यते बलिविधानमिदानीं शाकुनागममतेन शिवायाः । दिव्यमन्त्रबलिबाधितदोषं साधिताखिलसमुद्यतकार्य्यम् । शून्यालयं रुद्रगृहं श्मशानं चतुष्पथं मातृगृहं जलान्तम् । सन्ध्यावनिस्त्वरमेवमाद्या बलिप्रदानाय मताः प्रदेशाः । तेषान्तु मध्यादुचितप्रदेशे विशोधितं मण्डलकं विदध्यात् । पौराणिकश्लोकपरीक्षितायाः संगृह्य गोर्गोमयमन्तरीक्षात् । अत्यन्तजीर्णदेहाया बन्ध्यायाश्च विशेषतः । रोगार्त्तनवसूतायाः न गोर्गोमयमाहरेत् । तस्मिन् विचित्रं विततं विदध्यात् पिष्टातकेनाष्टदलं सरोजम् । संपूजयेत्तत्र सुराधिपादीन् क्रमेण सर्वानपि लोकपालान् । मध्ये सुतैः पञ्चभिरभ्युपेता शिवान्विता पिष्टमयी प्रसन्ना । पूज्या शिवा तुष्यति भक्तियोगात् प्रभूतपुष्पाक्षतधूपदीपैः । साज्यगुडौदनमाषकुलत्थैर्यावकपूपलिकामिषमद्यैः । संस्थितेन नरायणमात्रं बुद्धिमता बलिकर्म्मणि कार्य्यम् । प्राप्याष्टमीं वामचतुर्द्दशीं वा संमन्त्र्य मन्त्रेण च सप्तकृत्वः । बलिं शिवाया निशि निश्चयेन दद्यान्मनुष्यो यदि भद्रमिच्छेत्" ।

**शिवालय** न॰ शिवः आलीयतेऽत्र ली—अच् । १श्मशाने हारा॰ । २रक्ततुलस्यां शब्दर॰ । ३महादेवगृहे च पु॰ ।

**शिवालु** पु॰ शिवायालति अल—उन् । शृगाले राजनि॰ ।

**शिवास्मृति** स्त्री शिवायाः स्मृतिर्यस्याः ५ब॰ । जयन्तीवृक्षे शब्दच॰ तन्नामोच्चारणे हि जयन्तीनामकदुर्गायाः स्मरणमिति तस्यास्तथात्वम् ।

**शिवाह्लाद** पु॰ शिवमाह्लादयति आ+ह्लद—णिच्—अण् । १बकवृक्षे राजनि॰ । ६त॰ । २तत्सन्तोषे च ।

**शिवाह्वा** स्त्री शिवस्येवाह्वा यस्याः । रुद्रजटावृक्षे राजनि॰ । ६त॰ । २महादेवाह्वाने च ।

**शिवि** पु॰ शि—वि नि॰ न गुणः । १हिंस्रपशौ त्रिका॰ । २भूर्जवृक्षे ३उशीनरराजसुते नृपभेदे च मेदि॰ ।

**शिविका** स्त्री शिवं करोति शिव+णिच्—ण्वुल् अत इत्वम् । यानभेदे (डुली) अमरः ।

**शिविर** न॰ शी+किरच् वुक् च । कटके सैन्यनिवासस्थाने । शिविरलक्षणमुक्तं यथा "शिविरं परिखायुक्तमुच्चैःप्राकारवेष्टितम् । युक्तद्वादशद्वारञ्च सिंहद्वारपुरस्कृतम् । युक्तं चित्रैर्विचित्रैश्च कृत्रिमैश्च कपाटकैः । निषिद्धवृक्षरहितं प्रसिद्धैश्च पुरस्कृतम् । सुलक्षणं चन्द्रवेधं प्राङ्गणञ्च तथैव च" । तत्र विहितनिषिद्धवृक्षादि यथा "आश्रमे नारिकेलस्य दक्षिणाञ्च धनप्रदः । शिविरस्य यदीशाने पूर्वे पुत्रप्रदस्तरुः । सर्वत्र मङ्गलार्हश्च तरुराजो मनोहरः । रसालवृक्षः पूर्वस्मिन् नृणां सम्पत्प्रदस्तथा । शुभप्रदश्च सर्वत्र सुरकारो ! निशामय । बिल्वश्च पनसश्चैव जम्बीरो बदरी तथा । प्रजाप्रदश्च पूर्वस्मिन् दक्षिणे धनकस्तथा । सम्पत्प्रदश्च सर्वत्र यतो हि वर्द्धते गृही । जम्बुवृक्षश्च दाडिम्बः कदल्याम्रातकस्तथा । बन्धुप्रदश्च पूर्वस्मिन् दक्षिणे मित्रदस्तथा । सर्वत्र शुभदश्चैव धनपुत्रशुभप्रदः । हर्षप्रदो गुवाकश्च दक्षिणे पश्चिमे तथा । ईशाने सुखदश्चैव सर्वत्रैव निशामय । सर्वत्र चम्पकः शुद्धो भुवि भद्रप्रदस्तथा । अलाबुश्चापि कुष्माण्डं मायाम्बुश्च सुकासुकः । खर्जुरी कर्कटी चापि शिविरे मङ्गलप्रदाः । वास्तूकः कारवेल्लश्च वार्त्ताकुश्च शुभप्रदाः ॥ लताफलञ्च शुभदं सर्वं सर्वत्र निश्चि-